तरः, पुं, ( तॄ तरणे + “ऋदोरप् ।”३।३।५७। इति अप् । ) तरणम् । ( यथा, मनुः । ८ । ४०४ ।
“पणं यानं तरे दाप्यं पौरुषोऽर्द्धपणं तरे ॥”)
अग्न्याशुः । इति मेदिनी । रे, ४० ॥ इयः । इति भूरिप्रयोगः ॥ (“तरतमौ द्विबहूनामेकोत्कर्षे ।” इति मुग्धबोधसूत्रात् प्रत्ययविशेषश्च ॥)

तरः, [ स् ] क्ली, ( तॄ प्लवनतरणयोः + करणादौ यथायथं असुन् । ) बलम् । ( यथा, रघुः । ११ । ७७ ।
“तिष्ठतु प्रधनमेवमप्यहं
तुल्यबाहुतरसा जितस्त्वया ॥” )
वेगः । तीरम् । प्लवगः । इति शब्दरत्नावली ॥

तरक्षः, पुं, (तरक्षु + पृषोदरात् उलोपः ।) तरक्षुः । इत्यमरटीकायां भरतः ॥ ( यथा, बृहत्संहितायाम् । १२ । ६ ।
शैलकूटेस्तरक्षर्क्षशार्द्दूलशाखान्टगाथाश्रितैः॥)

तरक्षुः, पुं, ( तरं बलं मार्गं वा क्षिणोति । क्षिणु हिंसायाम् + मितद्र्वादित्वात् डुः ।) व्याघ्रविशेषः । नेकड़े वाघ इति भाषा ॥ तत्पर्य्यायः । तक्षुः २ मृगादनः ३ तरक्षुकः ४ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । १६३।१४।
“ततो मायां परां चक्रे देवशत्रुः प्रतापवान् ।
सिंहान् व्याघ्रान् वराहांश्च तरक्षूंश्च वा-
नरान् ॥”)

तरक्षुकः, पुं, ( तरक्षु + स्वार्थे कन् । ) तरक्षुः । इति शब्दरत्नावली ॥

तरङ्गः, पुं, ( तरति प्लवते इव । तॄ + “तरत्यादिभ्यश्च ।” उणां । १ । ११९ । इति अङ्गच् । ) वायुना नद्यादिजलस्य तिर्य्यगूर्द्ध्वप्लवनम् । ढेउ इति भाषा ॥ तत्पर्य्यायः । भङ्गः २ ऊर्म्मिः ३ वीचिः ४ । इत्यमरः ॥ ऊर्म्मी ५ वीची ६ विचिः ७ लहरी ८ हली ९ विलिः १० । इति भरतः ॥ लहरिः ११ । इति सारसुन्दरी ॥ जललता १२ उत्कलिका १४ ऊर्म्मिका १५ । इति जटाधरः ॥ वस्त्रम् । हयादीनां समुत्फालः । इत्युणादिकोषः ॥

तरङ्गिणी, स्त्री, ( तरङ्गो वीचिरस्त्यस्या इति । तरङ्ग + “अत इनिठनौ ।” इति इनिः । ) नदी । इत्यमरः । १ । १०।३० ॥ ( यथा, माघः ।
“तरङ्गिणी वेणिरिवायता भुवः ”)

तरणं, क्ली, ( तॄ + भावे ल्युट् ।) प्लवनपूर्व्वकदेशान्तरगमनम् । इति दुर्गादासः ॥ पारगमनम् । सन्तरणम् । यथा, मोहमुद्गरे । ६ ।
“क्षणमपि सज्जनसङ्गतिरेका
भवति भवार्णवतरणे नौका ॥”

तरणः, पुं, ( तीर्य्यतेऽनेनेति । तॄ + करणे ल्युट् । ) भेलकः । इति त्रिकाण्डशेषः ॥ स्वर्गः । इति शब्दचन्द्रिका ॥

तरणिः, स्त्री, ( तीर्य्यतेऽनयेति । तॄ + “अर्त्तिसृधृधम्यश्यवितॄभ्योऽनिः ।” उणां । २ । १०३ । इति अनिः । ) नौका । ( यथा, आर्य्यासप्तशत्याम् । ३९० ।
“त्वामनुधावति तरणिस्तदपि गुणाकर्षतरलेयम् ॥”)
घृतकुमारी । इत्यमरः । ४ । २ । ७३ ॥

तरणिः, पुं, ( तरति पापमनेनेति । तॄ + अणिः ।) सूर्य्यः । ( यथा, देवीभागवते । ३ । ६ । २८ ।
“इत्युक्त्वा तरणिः कुन्तीं तन्वङ्गीं सुलज्जिताम् ।
भुक्त्वा जगाम देवेशो वरं दत्त्वाभिवाञ्छितम् ॥”)
अर्कवृक्षः । इत्यमरः ॥ भेलकः । ( यथा, वोपदेवप्रशंसाश्लोकः ।
“सोऽयं व्याकरणार्णवैकतरणिर्धातुर्य्यचिन्तामणि-
र्जीयात् कोविदगर्व्वपर्व्वतपविः श्रीवोपदेवः कविः ॥”)
किरणः । इति हेमचन्द्रः ॥

तरणिपेटकः, पुं, (तरणिः पेटक इव । ) काष्ठाम्बुवाहिनी । इति जटाधरः ॥

तरणिरत्नं, क्ली, ( तरणिः सूर्य्यस्तत्प्रियं रत्नम् । ) माणिक्यम् । इति राजनिर्घण्टः ॥

तरणी, स्त्री, (तरणिः । कृदिकारादिति वा ङीष् ।) नौका । इति शब्दरत्नावली ॥ पद्मचारिणी । इति शब्दचन्द्रिका ॥ घृतकुमारी । इत्यमरटीकायां भरतः ॥

तरण्डः, पुं, क्ली, (तरति प्लवत इति । तॄ प्लवनतरणयोः + बाहुलकात् अण्डन् । ) । वड़िशीसूत्रबद्धकाष्ठादि । प्लवः । नौका । इति मेदिनी । डे, २९ ॥ कुम्भतुम्बीरम्भादिरचितः । इति शब्दरत्नावली ॥

तरण्डः, पुं, देशविशेषः । इति शब्दरत्नावली ॥

तरण्डपादा, स्त्री, ( तरण्डः प्लवनशीलः पादः प्रायेण तुरीयांशो यस्याः । ) नौका । इति शब्दरत्नावली ॥

तरण्डी, स्त्री, (तरत्यनयेति । तॄ + अण्डन् । गौरादित्वात् ङीष् ।) नौका । इति शब्दरत्नावली ॥ ( तरण्डा । इति हारावलीधृतपाठः । ५५ ॥ )

तरत्, [ द् ] स्त्री, ( तरत्यनेनेति । तॄ + बाहुलकाददिः । ) प्लवः । ( तरतीति । तॄ + कर्त्तरि अदिः ।) कारण्डवपक्षी । इति मेदिनी । दे, २९ ॥

तरदी, स्त्री, कण्टकिवृक्षभेदः । तत्पर्य्यायः । तारदी २ तीव्रा ३ खर्व्वुरा ४ रक्तबीजका ५ । अस्या गुणाः । तिक्तत्वम् । मधुरत्वम् । गुरुत्वम् । बल्यत्वम् । कफनाशित्वञ्च । इति राजनिर्घण्टः ॥

तरन्तः, पुं, ( तरतीति । तॄ + “तॄभूवहिवसीति ।” उणां । ३ ।१२८ । इति झच् ।) भेकः । आसारः । ( तीर्य्यते इति । + कर्म्मणि झच् । ) समुद्रः । इत्युणादिकोषः ॥

तरन्ती, स्त्री, ( तीर्य्यतेऽनयेति । तॄ + झच् । ततो ङीष् । ) तरिः । इत्युणादिकोषः ॥

तरपण्यं, क्ली, ( तॄ + भावे अप् । तरस्तरणं तस्य पणम् ।) आतरः । इत्यमरः । १ । १० । ११ ॥ नौका भाड़ा इति भाषा ॥

तरम्बुजं, क्ली, ( तरं तरलं अम्बुवत् जायतेऽत्र । जन + बहुलवचनात् डः ।) फलविशेषः । तरमूज इति ख्यातः । यथा, उत्तरकामाख्यातन्त्रे ।
“ज्यैष्ठे मासि महेशानि ! पौर्णमास्यां निशार्द्धके ।
तृष्णातुरा महाकाली भ्रमन्ती पिप्पलकानने ॥
तज्ज्ञात्वा ब्रह्मणा तस्यै फलं दत्तं तरम्बुजम् ।
तत्फलभक्षणात्तृप्ता वरदा सा हरप्रिया ॥
यो मे दद्यात् फलं रम्यं स चिरायुश्चतुर्युगम् ॥”

तरलः, पुं, ( तॄ + “वृषादिभ्यश्चित् ।” उणां । १ । १०८ । इति कलप्रत्ययश्चित्त्वञ्च ।) हारः । हारमध्यमणिः । ( यथा, महाभारते । ८ ।९४।१९ ।
“प्रकीर्णका विप्रकीर्णाश्च राजन् !
प्रवालमुक्तातरलाश्च हाराः ॥”)
तलम् । इत्यजयपालः ॥ ( जनपदविशेषः । तद्देशवासिनि बहुवचनान्तः । यथा, महाभारते । ८ । ८ । २० ।
“वत्सान् कलिङ्गान् तरलानश्मकानृषिकानपि ॥”)

तरलः, त्रि, ( तॄ + कलच् । ) चलः । ( यथा नैषधे । ५ । २४ ।
“त्वाः स्वभावमधुरैरनुभावैस्तावकैरतितरां तरला: स्मः ॥”)
षिड्गः । भास्वरः । इति मेदिनी । ले, ९५ ॥ मध्यशून्यद्रव्यम् । इति धरणिः । द्रवीभूतञ्च ॥

तरललोचना, स्त्री, (तरले चञ्चले लोचने यस्याः ।) चञ्चलनयना नारी । इति हेमचन्द्रः ॥

तरला, स्त्री, ( तॄ + कलच् टाप् च । ) यवागूः । सुरा । इति मेदिनी । ले, ९६ ॥ मधुमक्षिका । इति हेमचन्द्रः ॥

तरलितं, त्रि, (तरलं तारल्यमस्य जातम् । तरल + इतच् । तरल इवाचरति तारलं करोतीति । तरल + क्विप् + णिच् + क्त इति केचित् । ) जाततारल्यम् । तत्पर्य्यायः । प्रेङ्खोलितम् २ लुलितम् ३ प्रेङ्खितम् ४ इतम् ५ चलितम् ६ कम्पितम् ७ धूतम् ८ वेल्लितम् ९ आन्दोलितम् १० । इति हेमचन्द्रः ॥ (यथा, गीतगोविन्दे । १२ । १५ ।
“व्यालोलः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ ॥”)

तरवारिः, पुं, ( तरं समागतविपक्षबलं वारयतीति । तॄ + णिच् + इन् । ) खड्गः । तरवार इति भाषा । इति हेमचन्द्रः । ३ । ४४५ ॥

अथ खड्गपरीक्षा ।

“अङ्गं रूपं तथा जातिर्नेत्रारिष्टे च भूमिका ।
ध्वनिर्म्मानमिति प्रोक्तं खड्गज्ञानाष्टकं शुभम् ॥
अभिन्ने दृश्यते यादृक् विभिद्य दृश्यते तथा ।
यदेव दृश्यते चिह्नं तदङ्गं संप्रचक्षते ॥
नीलकृष्णादिकं खड्गे रूपमित्यभिधीयते ।
तेनैव यत् प्रतीतं स्यात् तज्जातिरिति गद्यते ॥
अङ्गातिरिक्तं यज्जातिस्तम्भाहात्म्यप्रकाशकम् ।
तन्नेत्रमिति जानीयात् खड्गे खड्गविशारदः ॥
अङ्गातिरिक्तं खड्गादिषु च्छिद्रत्वप्रकाशकम् ।
तदरिष्टमिति प्राहुर्भूमिरङ्गादिधारणम् ॥